# आचार्यप्रथमवर्षम्

## प्रथमपत्रम्-नव्यन्यायः

## शैक्षिकनिष्पत्तिः

ग्रन्थः – अवयवः
पाठ्यग्रन्थस्यास्य अध्ययनेन छात्राः-

- ❖ न्यायपदार्थनिर्वचनं, न्यायजन्यबोधस्य परामर्शप्रयोजकत्वं, लक्षणघटकोचितानूपूर्वीकत्वस्य परिष्कारं, न्यायप्रतिज्ञालक्षणयोः अन्योन्याश्रयस्य वारणक्रमं, प्रतिज्ञादिवाक्यपञ्चकस्य विशिष्टैकार्थबोधकताविरहं, प्रतिज्ञादिपञ्चकस्यैकवाक्यता- व्यवहारप्रयोजकं चावगन्तुं शक्नुवन्ति।
- ❖ अवयवत्वनिर्वचनं, न्यायन्तर्गतत्वनिर्वचनं, दीधितिकारोक्तावयवलक्षणे घटकस्य प्रतिज्ञाद्यन्यतमत्वस्य निर्वचनं, प्रतिज्ञाद्यन्यतमत्वाघटितस्य अवयवलक्षणस्य निर्दुष्टत्वं, प्रतिज्ञादिघटकतावच्छेदकत्वस्य परिष्कारान्तरं वदतां मतस्य परिशीलनं चावगन्तुं शक्नुवन्ति।
- ❖ प्रतिज्ञादिप्रत्येकवाक्यस्य न्यायत्वमिच्छतां मतस्य परिशीलनं, जातिघटितं न्यायप्रतिज्ञादिलक्षणं वदतां मतस्य परिशीलनं, मणिकृन्मतानुसारं सूत्रकारीयप्रतिज्ञालक्षणस्य परिशीलनं चावगन्तुं शक्नुवन्ति।

- ❖ दीधितिकारोक्तं सूत्रकारीयप्रतिज्ञालक्षणपरिष्कारं, मणिकारोक्तप्रतिज्ञालक्षणे दलसार्थक्यं, मिश्रसम्मतस्य प्रतिज्ञालक्षणनिविष्टानतिरिक्तपदसार्थक्यस्य परिशीलनं, अन्यूनविषयकत्वदलस्य अर्थान्तरोपवर्णनं च विज्ञातुं शक्नुवन्ति।
- ❖ इदं पदाननुषङ्गपक्षे अनतिरिक्तविषयकत्वदलव्यावृत्तिपरिशीलनम्, अन्यूनानतिरिक्तविषयकेति पदस्य यथाश्रुतार्थपरिशीलनं, साध्यतावच्छेदकविशिष्टसाध्यविषयकत्वनिवेशव्यावृत्तिं च विज्ञातुं शक्नुवन्ति।
- ❖ अनुमितिप्रतिज्ञार्थबोधयोः वैलक्षण्योपदर्शनपूर्वकम् अव्याप्त्युद्भावनं, तन्निवारणार्थम् अनुसरणीयपरिष्कारम्, अन्यैः उपदर्शितप्रतिज्ञालक्षणस्य परिशीलनं चावगन्तुं शक्नुवन्ति।
- ❖ पाकाद्यवच्छिन्नकृतिसाध्यकस्थले उपनयाकारं, मणिकृन्मतानुसारम् उपनयाकारं, तथा चायमित्येव उपनयः इति वदतां मतस्य परिशीलनं, प्रतिज्ञालक्षणे योग्यतानिवेशस्य व्यावृत्तिम्, अन्यूनानतिरिक्तत्वाघटितस्य प्रतिज्ञालक्षणस्य निष्कर्षं च विज्ञातुं शक्नुवन्ति।
- ❖ लिङ्गाविषयकत्वदलसार्थक्यवर्णनं, बहिर्भूतत्वपदार्थनिर्वचनं, कल्पान्तरेण प्रतिज्ञालक्षणनिर्वचनं, गमकतौपेयिकत्वपदार्थनिर्वचनं, हेतुविषयकज्ञानजनकप्रतिज्ञास्थले अव्याप्तिवारणाय परिष्कारान्तरम् अनुसरतां मतं, प्रकान्तरेण प्रतिज्ञालक्षणानि चावगन्तुं शक्नुवन्ति।

**********